# संस्कृत-वार्ताः

**दिनाङ्क :- 17.06.2025** **सायम् :- 06:20**

**मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्र मोदी जी-7 शिखरसम्मेलने भागं ग्रहीतुं केनडा देशं गमिष्यति; ऊर्जा-सुरक्षायाः, तन्त्रज्ञानस्य, वैश्विक-समस्यानां च विषये चर्चां करिष्यति।
- जी-7 राष्ट्राणां नेतारः इस्रायेल्-देशस्य आत्मरक्षायाः अधिकारः अस्तीति सुनिश्चीय; पश्चिम-एशियादेशे शान्तिं स्थिरतां चानेतुं प्रतिबद्धतां प्रकटितवन्तः; अमेरिकादेशस्य राष्ट्रपतिः डोणाल्ड् ट्रम्पः अस्मिन् क्षेत्रे अद्यतनविकासानां मध्ये शिखरसम्मेलनं पूर्वमेव त्यक्तवान्।
- विदेशमन्त्रालयेन इरान्-इस्राइल्-देशयोः वर्तमानस्थित्योः निरीक्षणार्थं, भारतीयनागरिकाणां साहाय्यार्थं च नियन्त्रण-कक्षस्य स्थापना कृता अस्ति।
- रेलमन्त्री अश्विनीवैष्णवः अद्य भारतस्य बृहत्तमस्य गतिशक्ति-मल्टी-मोडल-कार्गो-टर्मिनल् इत्यस्य उद्घाटनम् हरियाणायाः मानेसरेति क्षेत्रे अकरोत्।
- भारतर्तुविज्ञानविभागेन अद्य सौराष्ट्र-कच्छक्षेत्रयोः अतिवृष्टेः पूर्वानुमानं प्रकटितम्।
- एफ्. आई. एच्. इत्यस्य प्रो-लीग् इत्यस्यां हॉकीक्रीडायां भारतीय-महिला-दलम् अद्य लण्डन्-नगरस्य ली-व्याली-हॉकी-एण्ड्-टेनिस्- इति क्रीडाङ्गणे अर्जेण्टीना-देशं विरुध्य क्रीडति।

**प्रधानमंत्री कनाडा**

अद्य सायंकाले कनाडादेशस्य कनानास्कीस-नगरे जी-7 शिखरसम्मेलने प्रधानमन्त्री नरेन्द्रमोदी भागं ग्रहिष्यति। कैलग्री विमानस्थानके सम्प्राप्तौ तस्य हार्दिकं स्वागतम् अभवत्। प्रधानमन्त्री ऊर्जासुरक्षा, प्रौद्योगिक्याः, आधारभूतसंरचनायाः, निवेशस्य च विषये चर्चायां जी-7 इत्यत्र भागं भजिष्यति, येन परिवर्तनशीलविश्वस्य उपलब्धता, सामर्थ्यञ्च सुनिश्चिता भवेत्। शिखरसम्मेलनावधौ प्रधानमन्त्री जी-7 देशानाम् नेतृभिः सह विचारविनिमयं करिष्यति, कनाडादेशस्य प्रधानमन्त्री मार्क कार्नी इत्यनेन सह विभिन्न-द्विपक्षीय-विषयेषु उपवेशनं करिष्यति। सः अन्यैः आमन्त्रितैः देशैः अन्ताराष्ट्रियसङ्गठनप्रमुखैः च सह महत्त्वपूर्णवैश्विकविषयेषु विचाराणां आदानप्रदानं करिष्यति। दशकेऽस्मिन् प्रधानमन्त्रिणः मोदिनः कनाडादेशस्य प्रथमा यात्रा अस्ति। पञ्चदशोत्तर-द्विसहस्र-तमे वर्षे अन्तिम-यात्रावधौ द्विपक्षीयसम्बन्धाः सामरिकसहभगितायाः स्तरं च संवर्धितमस्ति ।

**ट्रंप-जी-7**

अमरीकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्प् इत्येषः जी-सप्त शिखरसम्मेलनात् पूर्वमेव निर्गत्य इस्रेल्-इरान्-देशयोर्मध्ये तीव्रसङ्घर्षस्य मध्ये वाशिङ्गटन्-नगरं प्रत्यागतवान्। अत्रान्तरे, विश्वनेतृभिः पश्चिम-एशियादेशे डी-एस्केलेशन् इत्यस्य आग्रहाय संयुक्त-वक्तव्यस्य प्रकाशनात् कतिपयहोराणामनन्तरम् एव एतत् कार्यम् अभवत्।

**विदेशमन्त्रालय-नियन्त्रण कक्षः**

विदेशमन्त्रालयेन इरान्-इस्राइल्-देशयोः वर्तमानस्थित्योः निरीक्षणार्थं, भारतीयनागरिकाणां साहाय्यार्थं च सप्तदिवसात्मकस्य अहोरात्र्योः नियन्त्रण-कक्षस्य स्थापना कृता अस्ति। बहुविध-सहायिका-टोल्-फ्री इति सङ्ख्या च प्रकाशितास्ति, संख्यास्ति 1800118797 इति। अनेनैव सह ईमेल्- व्हाट्सैप् आदीनामपि व्यवस्था विहितास्ति।

**वैष्णवः मानेसरः**

रेलमन्त्री अश्विनीवैष्णवः अद्य भारतस्य बृहत्तमस्य गतिशक्ति-मल्टी-मोडल-कार्गो-टर्मिनल् इत्यस्य उद्घाटनम् हरियाणायाः मानेसरेति क्षेत्रे अकरोत्। अस्मिन् अवसरे, श्रीवैष्णवः अधोरेखितवान् यत् पञ्चचत्वारिंशत् एकड़ इति परिमितेषु क्षेत्रेषु विस्तृते कार्गो-टर्मिनल् इत्यत्र सार्धचतुर्लक्षपरिमितानां वाहनानां वहनक्षमता अस्ति। सः अवदत् यत् अष्टोत्तरैकशतपरिमितानि मल्टीमोडल् कार्गो टर्मिनल्स् इति अधुना सिद्धानि सन्ति

**भारतर्तुविज्ञानविभागेन**

भारतर्तुविज्ञानविभागेन अद्य सौराष्ट्र-कच्छक्षेत्रयोः अतिवृष्टेः पूर्वानुमानं प्रकटितम्। देशस्य अन्येषु केषुचित् भागेषु यथा सौराष्ट्र, कच्छ, पश्चिमबङ्गाल, ओडिशा, बिहार, झारखण्ड राज्येषु आगामिषु चतुर्विंशति होरासु तीव्रवज्रपातैः सह प्रचण्डवृष्टिः निरन्तरं भविष्यति। विभागेनोक्तं यत् बिहारे, झारखण्डे, मध्यप्रदेशे, राजस्थाने च अद्य वज्रपातस्य, विद्युद्योतनस्य च सम्भावना वर्तते। अद्य अपराह्णे दिल्ली-क्षेत्रे वर्षा अभवत्, येन ग्रीष्मस्य तप्तातापे न्यूनतागता । नोएडा-गुरुग्राम-नगरयोः केषुचित् भागेषु तीव्रवायुना सह प्रचण्डवृष्टिः अभवत् । ऋतुविभागेन शुक्रवासरपर्यन्तं हरियाणा-पञ्जाब-उत्तरप्रदेशैः सह दिल्ली-एनसीआर-क्षेत्रे झंझावातं समेत्य लघुतः मध्यम-वृष्टेः पूर्वानुमानं प्रकटितम्।

**गुजरात- डीएनए परीक्षणं**

सद्यः एव जातायाम् अहमदाबादविमानदुर्घटनायां प्रायः द्विषष्ट्योत्तरैकशतं यावत् मृतानां डीएनए इति परीक्षणं सफलतापूर्वकं जातम्। गुजरातस्य गृहराज्यमन्त्री हर्षसङ्घवी अद्य सोशल मीडिया इत्यत्र लिखिते सन्देशे सूचनां प्रदत्तवान्। राज्यसर्वकारः केन्द्रीयसंस्थाभिः सह मिलित्वा न्यायिक-विधी-औपचारिकतां द्रुततया कुर्वन् अस्ति। सम्प्रति एयर इण्डिया इत्यस्य अहमदाबादतः लंदन्-नगरं प्रति घातकविमानदुर्घटनानन्तरं नूतनेन सङ्केतेन सह विमानसेवा समारब्धा। परञ्च अद्य विमानस्य अनुपलब्धतायाः कारणात् यात्रा स्थगिता।

**उपराष्ट्रपति-विकसित भारत**

उपराष्ट्रपतिः जगदीपधनखडः अवदत् यत् विकसितभारतम् केवलं स्वप्नः एव न अपितु एकं निश्चितं गन्तव्यम् अस्ति, यद्धि सुदृढज्ञानार्थव्यवस्थया संचालितम् अस्ति। पाण्डिचेरी विश्वविद्यालयस्य छात्रैः, संकायसदस्यैः, कर्मचारिभिः च सह संवादं कुर्वन् सः देशं विकसितभारतस्य दिशि नयनाय प्रमुखहितधारकत्वेन यूनां छात्राणां च महत्त्वपूर्णां भूमिकां प्रकाशितवान्। शिक्षायाः महत्त्वं प्रकाशयन् उपराष्ट्रपतिः अवदत् यत् शिक्षा एका महती समानतायाः कारिका अस्ति, या असमानतां नष्टं करोति। श्रीजगदीपधनखडः भारतस्य पारम्परिकगुरुकुलव्यवस्थायां आधारभूतमूल्यानां पुनरागमनस्य आग्रहपूर्वकं शिक्षायाः वस्तुकरणं व्यावसायिकीकरणं च विरुध्य सञ्चेतना अददात्।

**विदेशमन्त्रालयः भारतीयच्छात्राः**

ईरान्-देशस्य तेहरान्-नगरे भारतीय-दूतावासेन भारतीयच्छात्राः सुरक्षाकारणात्वात् नगरात् बहिः नीताः सन्ति। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् अन्ये निवासिनः ये परिवहनविषये स्वावलम्बिनः सन्ति, ते अपि परिवर्तमानां स्थितिं दृष्ट्वा नगरात् बहिः गन्तुं सूचिताः सन्ति। केचन भारतीयाः आर्मेनिया-देशस्य सीमायां ईरान्-देशात् निर्गन्तुं सुलभतां प्राप्तवन्तः। भारतीयदूतावासः सर्वविध सम्भव साहायतां प्रदातुं समुदायेन सह निरन्तरं सम्पर्के अस्ति।

**इरान्-इस्राइल्-सङ्घर्षः**

इस्राइल्-देशस्य सेना कथयति यत् रात्रौ ईरान्-देशात् प्रेषितान् त्रिंशत् ड्रोन्स्- इत्यस्य आक्रमणम् अवरोधितवती इति, एतावत्पर्यन्तं आक्रमणं न्यूनातिन्यूनं प्रभावपूर्णम् अस्तीति सेनया प्रोक्तम्। अद्य प्रायः विंशतिः प्रक्षेपास्त्राणां प्रक्षेपणम् अभवत्, येन येरूसलम्, वेस्ट्-बैङ्कादिकञ्च स्थलानि आहत्य सम्पूर्णे इस्राइल्-देशे सायरनाख्या सञ्चेतनात्मिका ध्वनिः अभवत्। मध्य-इस्राइल्-देशे

प्रत्यक्ष-प्रहारेण सम्पत्ति-क्षतिः अभवत्, यद्यपि अधिकारिणः अद्यापि विवरणानां पुष्टिं न कृतवन्तः। अरब्-मुस्लिम्-देशानां विदेश-मन्त्रिणः इरान्-देशस्य उपरि इस्राइल्-देशस्य आक्रमणानां निन्दाम् अकुर्वन्। अमरीकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन तेहरान्-नगरात् तत्क्षणमेव निष्कासनाय आग्रहः कृतः।

**आईसीसी महिलानां सम्मानम्**

आईसीसी इत्यस्य महिलानां एकदिवसीय-क्रिकेट-क्रीडायां- भारतस्य स्मृति मन्धाना षड्वर्षानन्तरं पुनः प्रथमस्थानं प्राप्तवती। अष्टाविंशति वर्षीया एषा क्रीडिका सप्तविंशत्युत्तर-सप्तशत रेटिङ्ग्-इति-अङ्कैः सह दक्षिण-आफ्रिकादेशस्य लौरा वोल्वार्ड्ट् इत्येनां अतिक्रम्य शीर्षस्थानम् अवाप्नोत्।

**हॉकी:**

एफ्. आई. एच्. इत्यस्य प्रो-लीग् इत्यस्यां हॉकीक्रीडायां भारतीय-महिला-दलम् अद्य लण्डन्-नगरस्य ली-व्याली-हॉकी-एण्ड्-टेनिस्- इति क्रीडाङ्गणे अर्जेण्टीना-देशं विरुध्य क्रीडति। सम्प्रति नवाङ्कैः सह सप्तमे स्थाने स्थितं भारतीयदलं, अङ्कतालिकायां द्वितीयस्थानस्थितेन अर्जेण्टीना-देशस्य दलेन सह कठिनसंघर्षमपेक्षते।

**।। इति वार्ताः ।।**